# Shri Martandabhairava Stotram

# શ્રીમાર્તણ્ડભૈરવસ્તોત્રમ્

## Document Information

Text title : mArtaNDabhairavastotram

File name : mArtaNDabhairavastotram.itx

Category : shiva

Location : doc_shiva

Latest update : December 17, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીમાર્તણ્ડભૈરવસ્તોત્રમ્

ભૈરવા ઊચુઃ -
નમો માર્તાણ્ડનાથાય સ્થાણવે પરમાત્મને ।
ભૈરવાય સુભીમાય ત્રિધામ્નેશ નમો નમઃ ॥ ૧॥

મૃતોદ્ધારણદક્ષાય ગર્ભોદ્ધરણહેતવે ।
તેજસાં કેતવે તુભ્યં હેતવે જગતામપિ ॥ ૨॥

હિરણ્યગર્ભરૂપાય ધીપ્રણોદાય તે નમઃ ।
ઓઙ્કારવ્યાહૃતિસ્થાય મહાવીરાય તે નમઃ ॥ ૩॥

વીરેશાય નમસ્તુભ્યં ક્ષેત્રેશાય નમો નમઃ ।
વેદાર્થાય ચ વેદાય વેદગર્ભાય શમ્ભવે ॥ ૪॥

વિશ્વામિત્રાય સૂર્યાય સૂરયે પરમાત્મને ।
મહાભૈરવરૂપાય ભૈરવાનન્દદાયિને ॥ ૫॥

દ્વિવિધધ્વાન્તધ્વંસાય મહામોહવિનાશિને ।
માયાન્ધકારનાશાય ચક્ષુસ્તિમિરભઞ્જિને ॥ ૬॥

મન્ત્રાય મન્ત્રરૂપાય મન્ત્રાક્ષરવિચારિણે ।
મન્ત્રવાચ્યાય દેવાય મહામન્ત્રાર્થદાયિને ॥ ૭॥

યન્ત્રાય યન્ત્રરૂપાય યન્ત્રસ્થાય યમાય તે ।
યન્ત્રૈર્નિયન્ત્રૈર્નિયમૈર્યમિનાં ફલદાય ચ ॥ ૮॥

અજ્ઞાનતિમિરધ્વંસકારિણે ક્લેશહારિણે ।
મહાપાતકહર્ત્રે ચ મહાભયવિનાશિને ॥ ૯॥

ભયદાય સુશીલાય ભયાનકરવાય તે ।
બીભત્સાય ચ રૌદ્રાય ભીતાભયપ્રદાયિને ॥ ૧૦॥

તેજસ્વિતેજોરૂપાય ચણ્ડાયોગ્રાય તે નમઃ ।

બીજાય બીજરૂપાય બીજભર્ગાય તે નમઃ ॥ ૧૧॥

ક્રોધભર્ગાય દેવાય લોભભર્ગાય તે નમઃ ।
મહાભર્ગાય વૈ તુભ્યં જ્ઞાનભર્ગાય તે નમઃ ॥ ૧૨॥

ઘોરભર્ગાય તે તુભ્યં ભીતિભર્ગાય તે નમઃ ।
સુશોકાય વિશોકાય જ્ઞાનભર્ગાય તે નમઃ ॥ ૧૩॥

તત્ત્વભર્ગાય દેવાય મનોભર્ગાય વૈ નમઃ ।
દારિદ્ર્યદુઃખભર્ગય કામભર્ગાય તે નમઃ ॥ ૧૪॥

હિંસાભર્ગાય તામિસ્રભર્ગાય જગદાત્મને ।
અતિદુર્વાસનાભર્ગ નમસ્તે ભૈરવાત્મને ॥ ૧૫॥

ધ્યાયન્તે યં ભર્ગ ઇતિ ભર્ગભર્ગાય તે નમઃ ।
રોગભર્ગાય દેવાય પાપભર્ગાય તે નમઃ ॥ ૧૬॥

મહાપાતકભર્ગાય હ્યુપપાતકભર્ગિણે ।
મહાનિરયભર્ગાય નૃત્તભર્ગાય તે નમઃ ॥ ૧૭॥

ક્લેશભર્ગાય દેવાય ભૌતિકઘ્નાય તે નમઃ ।
મૃત્યુભર્ગાય દેવાય દુર્ગભર્ગાય તે નમઃ ॥ ૧૮॥

ધ્યાનાદ્ધ્યાયન્તિ યદ્ભર્ગં યમિનઃ સંયતેન્દ્રિયાઃ ।
નાથાય ભર્ગનાથાય ભર્ગાય સતતં નમઃ ॥ ૧૯॥

વીરવીરેશ દેવેશ નમસ્તેઽસ્તુ ત્રિધામક ।
મહામાર્તાણ્ડ વરદ સર્વાભયવરપ્રદ ॥ ૨૦॥

નમો વીરાધિવીરેશ સૂર્યચન્દ્રાતિધામક ।
અગ્નિધામાતિધામ્ને ચ મહામાર્તાણ્ડ તે નમઃ ॥ ૨૧॥

વીરાતિવીર વીરેશ ઘોરઘોરાર્તિઘોરક ।
મહામાર્તાણ્ડદેવેશ ભૂયો ભૂયો નમો નમઃ ॥ ૨૨॥

ઇતિ શ્રીમાર્તણ્ડભૈરવસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Martandabhairava Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*